लोकप्रियसाहित्यग्रन्थमाला- 57

# सुगत शासन सारः

[ हिन्द्यनुवादव्याख्यापरिशिष्टादिभिरलङ्कृतः ]

ग्रन्थकारः
शैतल संघसेनः
( संघसेन सिहः )

राष्ट्रियसंस्कृतसंस्थानम्
( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः )
नवदेहली

# विषयानुक्रमः


| | | पृष्ठ. |
|---|---|---|
| पुरोवाक् (आचार्यो राधावल्लभ त्रिपाठी) | | *iii* |
| 1. | प्रथमः परिवर्तः<br>*बाह्य-निदानम्* | 1 |
| 1. | प्रथमः परिवर्तः<br>*निदानम्* | 9 |
| 2. | द्वितीयः परिवर्तः<br>*बुद्धतत्त्वम्* | 16 |
| 3. | तृतीयः परिवर्तः<br>*मध्यममार्गः* | 18 |
| 4. | चतुर्थः परिवर्तः<br>*आर्यसत्यानि* | 24 |
| 5. | पञ्चमः परिवर्तः<br>*अनात्मवादः* | 26 |
| 6. | षष्ठः परिवर्तः<br>*प्रतीत्यसमुत्पादः* | 30 |
| 7. | सप्तमः परिवर्तः<br>*सौगती साधना (आद्या)* | 37 |
| 8. | अष्टमः परिवर्तः<br>*सौगती साधना (उत्तरा)* | 44 |
| 9. | नवमः परिवर्तः<br>*विज्ञानद्वारम्* | 51 |

# पुरोवाक्

सन्तोषप्रदमिदं वृत्तं यदाचार्यसंघसेनविरचितः सुगतशासनसारः संस्थानेन प्रकाश्यते। अयं प्रथमः सारसङ्ग्रहः यत्र बुद्ध-शासनस्य बौद्ध- शास्त्रस्य च प्रायः सर्वे सिद्धान्ताः सूत्ररूपेण निबद्धा विवेचिताश्च। बौद्धशास्त्रे प्रवेशार्थिनां छात्राणाम् इतरजनानां च कृतेऽयं ग्रन्थोऽतीव उपयोगी भविष्यतीति प्रतिभाति।

ग्रन्थेऽस्मिन् एकादशाः परिवर्ताः (परिच्छेदाः) सन्ति। निदान-परिवर्ते प्रस्तावना-परिवर्ते वा विषयस्य स्थापनं कृतम्। अस्य परिवर्तस्य प्रथमे भागे गौतम बुद्धस्य संक्षिप्तं जीवनवृत्तं बौद्धशासनस्य विस्तारश्च कथितः। द्वितीये भागे बुद्धभावस्य बुद्धवचनस्य च प्रकृतिः वर्णिता। द्वितीये परिवर्ते बुद्धतत्त्वं, तृतीये परिवर्ते कामसुखानुयोगात्मक्लमथानुयोगान्तरालवर्ती मध्यममार्गः, चतुर्थे परिवर्ते चत्वारि आर्यसत्यानि, पञ्चमे परिवर्ते अनात्मवादः, षष्ठे परिवर्ते बुद्धशासनस्य हृदयभूतः प्रतीत्यसमुत्पादः, सप्तमाष्टमपरिवर्तयोः सौगती साधना, नवमे परिवर्ते विज्ञानद्वारं, दशमे परिवर्ते तार्किका आभासाः, अन्तिमे च एकादशे च परिवर्ते प्रवृत्ताध्वसङ्केताः संवर्णिता विवेचिताश्च।

ग्रन्थस्यान्ते बहूपयोगीनि पञ्च परिशिष्टानि योजितानि तद्यथा प्रथमे परिशिष्टे सौगत-पदार्थसङ्ग्रहो, द्वितीये परिशिष्टे सौगतप्रकीर्णकपदसङ्ग्रहस् तृतीये परिशिष्टे अतीतबुद्धानुक्रमणिका, चतुर्थे परिशिष्टे पञ्चवर्गीय-भिक्ष्वनु-क्रमणिका, पञ्चमे परिशिष्टे तु सम्पूर्णं वज्रच्छेदिकाप्रज्ञापारमितासूत्रं च समायोजितानि। अनेन प्रकारेण ग्रन्थस्य उपयोगिता वर्धिता।

आचार्यसंघसेनेन संस्कृते एतादृशानां ग्रन्थानाम् अभावस्य पूरणाय यो यत्नः कृतः, स प्रशंस्यः। मन्ये, सारसङ्ग्रहोऽयं छात्रेषु जिज्ञासुपाठकेषु च लोकप्रियः स्यादिति।

**राधावल्लभ त्रिपाठी**

कुलपतिः

हो।

(ग) मिथ्यादृष्टि–हेतु व फल के विषय में और कर्म व फल के विषय में अयथार्थ दृष्टि। उसके कारण आदमी सत् वस्तु को भी असत् की भाँति देखता है। शुभ वस्तु को भी अशुभ की भाँति मानता है।

(घ) दृष्टिपरामर्श–सत्कायदृष्टि, अन्तग्राहदृष्टि और मिथ्यादृष्टि के आश्रयभूत स्कन्धों को श्रेष्ठ स्वीकार करना।

(ङ) शीलव्रतपरामर्श-स्कन्धों को जो शील और व्रत के आश्रय हैं, उन्हें मोक्षदायक, परिशुद्ध, संसार को पार कराने वाले समझते हुये (व्यक्ति) की मलिन दृष्टि।

21. **मानः क्लेशः। स चैत्तः।**

**(क) स्वोच्चताकारको दर्पोनाम मानः।**

**(ख) स भवत्यतिमानो यः सदृशेषु स्वकीयोत्तमतादर्पः, उत्तमेषु वा स्वकीयसदृशतादर्पः।**

**(ग) मानातिमानः स भवति य उत्तमेषु स्वकीयः परमोत्तमतादर्पः।**

**(घ) अस्मिमानो नाम पञ्चसु स्कन्धेषु य आत्मत्वदर्पः, आत्मीयतादर्पश्च।**

**(ङ) अभिमानः खलु सोऽस्ति यो लोकोत्तरतत्त्वावबोधस्य स्वगतो मिथ्यादर्पः।**

**(च) ऊनमानः स यो हि स्वकीयः स्वल्पोन्नतादर्पो विशिष्टेभ्यो महद्भ्यश्च।**

**(छ) मिथ्यामानः स योऽगुणवत्सु स्वकीयो गुणवत्त्वदर्पः। एवं सप्तविधो मानः।**

मान क्लेश है। वह चैत्त है अर्थात् चित्त का धर्म है।

(क) मान अपने को ऊँचा करने वाला घमंड है।

राष्ट्रियसंस्कृतसंस्थानम्

( भारतशासन-मानवसंसाधनविकासमन्त्रालयाधीनः,
राष्ट्रियमूल्याङ्कन-प्रत्यायनपरिषदा 'ए'-श्रेण्या प्रत्यायितः मानितविश्वविद्यालयः )

56-57, इन्स्टीट्यूशनल एरिया, जनकपुरी, नवदेहली-110058

दूरभाष : 011-28524993, 28521994, 28520977

email : rsks@nda.vsnl.net.in
website : www.sanskrit.nic.in